Setubandha - 9th - SamskritaM (1st Lang./3rd Lang.) 30 बन्धः ॥

# Setubandha 2021-22-30 Days

## सेतुबन्धसाहित्यम् – संस्कृतम् (प्रथमभाषा/तृतीयभाषा)

नवमकक्ष्या –9th Std. F.L./T.L Samskritham- Setubandha.

| दिनानि | लक्षिताधिगमः | अधिगमांशाः | क्रियाकलापाः | निर्वहणसूचनाः |
|---|---|---|---|---|
| १. प्रथमदिनम् | सङ्ख्यावाचकपदानां ज्ञानम् | १तः ५० पर्यन्तम्। | १. सङ्ख्याक्रीडा।<br>२. स्फोरकपत्राणि दृष्ट्वा सङ्ख्याकथनम्। | १. छात्राःक्रमशः एकैकशः अग्रिमसङ्ख्याः वदेयुः।<br>२.छात्राः स्फोरकपत्राणि दृष्ट्वा सङ्ख्याः कथयन्ति। |
| २. द्वितीयदिनम् | सङ्ख्यावाचकपदानां ज्ञानम् | ५१ तः १०० पर्यन्तम् | १. एकश्वासेन सङ्ख्या कथनम्।<br>२. चित्रेषु सङ्ख्यागणनम्। | १. छात्राः एकश्वासेन यथाशक्ति सङ्ख्याः कथयेयुः। |

| | | | | |
|---|---|---|---|---|
| | | | | २. शिक्षकदर्शितचित्राणि दृष्ट्वा तत्र विद्यमानानां वस्त्वादीनां सङ्ख्यां वदेयुः। |
| ३. तृतीयदिनम् | संस्कृतस्य समयज्ञानम्। | १ वादनतः १२ वादनपर्यन्तम्। | १. घटीं दृष्ट्वा समयकथनम्। २.समयं श्रुत्वा घट्यां समययोजनम्। | १.छात्राः घटीं दृष्ट्वा समयं कथयन्ति। २.छात्रैः उक्तं समयं निर्दिष्टः छात्रः घट्यां योजयेत्। |
| ४. चतुर्थदिनम् | संस्कृतस्य समयज्ञानम्। | सपाद–सार्ध–पादोनवादनानि। निमेषयुक्तसमयश्च। | १. संयोज्यलेखनम्। २.संस्कृतेन दिनचर्यालेखनम्। | १. उदा– २.३५ पञ्चत्रिंशन्निमेषाधिकद्विवादनम्। २.छात्राः स्वस्वदिनचर्यां लिखेयुः। |

| | | | | |
|---|---|---|---|---|
| ५. पञ्चमदिनम् | प्रश्नवाचकपदानां ज्ञानम्। | प्रश्नार्थक–सप्तककाराः। | १.छात्रैः परस्परं प्रश्नकरणम्।<br>२. चित्रं दृष्ट्वा प्रश्ननिर्माणम्। | १, उदा– भवतः गृहे कति जनाः सन्ति?<br> २. फलं कुत्र अस्ति? |
| ६. षष्ठदिनम् | विभक्तीनां ज्ञानम्। | विभक्तीनां स्थूलरूपेण परिचयः। | १.विभक्तीनां नामकथनम्।<br>२.विभक्तीनां क्रमशः योजनम्। | १. छात्राः विभक्तीनां नामानि वदन्ति।<br>२. शिक्षकः स्फोरकपत्राणि स्थापयति। निर्दिष्टः छात्रः तानि स्पोरकपत्राणि क्रमशः योजयति। |
| ७. सप्तमदिनम् | विभक्तीनां ज्ञानम्। | रामशब्दः। | १. भित्तिपटस्थ–विभक्तीनाम् | १.शिक्षकेण |

| | | | | |
|---|---|---|---|---|
| | | | अभिज्ञानम्।<br>२. विभक्तिपरिवर्तनम्। | अकारान्तपुंलिङ्गशब्दरूपयुक्ते भित्तिपटे लिखितानां शब्दानां विभक्तीःछात्रा वदन्ति। उदा– देवानाम्–षष्ठीविभक्तिः।<br>२.उदा– रामाय तृतीयाविभक्तौ परिवर्तनम्– रामेण। (पि.पि.टि द्वारा अपि एतं क्रियाकलापं कर्तुं शक्यते) |
| ८. अष्टमदिनम् | विभक्तीनां ज्ञानम्। | कलाशब्दः। | १.प्रदत्तपदानाम् अर्थकथनम्।<br>२.वचनपरिवर्तनम्। | १.शिक्षकः कस्यचित् प्रातिपदिकस्य अर्थम् उक्त्वा तस्यैव प्रातिपदिकस्य विभक्तिरूपाणि वदति । छात्राः |

| | | | | |
|---|---|---|---|---|
| | | | | तस्य अर्थं वदेयुः।<br>2. छात्राः पि.पि.टि द्वारा प्रदत्तपदस्य एकवचने बहुवचने वा परिवर्तनं कुर्वन्ति। |
| ९. नवमदिनम्। | विभक्तिज्ञानम्। | वनशब्दः। | १.पदान्वेषणम्।<br>२. रसप्रश्नः। | १.पाठेषु अकारान्तनपुंसकशब्दरूपाणाम् अन्वेषणम्।<br>२. पि.पि.टि. साहाय्येन रसप्रश्नस्पर्धां कर्तुं शक्यते। |
| १०. दशमदिनम्। | क्रियापदानां ज्ञानम्। | धातुक्रियापदलकारकालपुरुष वचनानि। | १. क्रीडा –चित्राणि दृष्ट्वा क्रियापदानां कथनम्।<br>२. क्रीडा –अभिनयः–ऊहा च। | १.पि.पि.टि. मध्ये / स्फोरकपत्रेषु स्थितानि चित्राणि दृष्ट्वा क्रियापदानां कथनम्। |

| | | | | |
|---|---|---|---|---|
| | | | | २.शिक्षकः चीटिकासु अनेकानि क्रियापदानि लिखित्वा पिधाय च एकत्र स्थापयति। ततः शिक्षकनिर्दिष्टाः छात्राः क्रमशः आगत्य चीटिकां स्वीकृत्य तत्र लिखितं क्रियापदं मनसि एव पठित्वा अभिनयं कुर्वन्ति। अन्ये छात्राः अभिनयं दृष्ट्वा एव चीटिकायां किं क्रियापदमस्तीति ऊहां कुर्युः। |
| ११ एकादशं दिनम्। | क्रियापदानां ज्ञानम्। | लट्–लृट्लकारौ। | १. स्मरणक्रीडा<br>२.लट्लकाररूपाणां लृट्लकारे परिवर्तनम्। | शिक्षकः विविधक्रियापदानां लट्लकार–प्रथमपुरुषैकवचनरूपाणि द्विवारं त्रिवारं वा वदति। तत् श्रुत्वा छात्राः तानि क्रियापदानि वदेयुः। |

| | | | | |
|---|---|---|---|---|
| १२. द्वादशं दिनम्। | | लङ्–लोट्लकारौ। | १. क्रीडा –क्रियापदानाम् अन्वेषणम्।<br><br>२. क्रियापदानां लकारानुगुणं विभागः । | १. शिक्षकः छात्राणां गणद्वयं कृत्वा कस्यचित् धातोः लट्/लोट्लकारयोः रूपाणि चीटिकायां लिखित्वा एकस्य गणस्य छात्रेभ्यः ताः चीटिकाः पिधाय ददाति। सर्वेपि छात्राः अन्ये यथा न पश्येयुः तथा तां चीटिकामुद्घाट्य पश्येयुः। ततः शिक्षकः यत् क्रियापदरूपं वदति तत् क्रियापदं अन्यस्य गणस्य छात्रः कस्य छात्रस्य समीपे अस्तीति अवकाशद्वयान्तरे (2 |

| | | | | |
|---|---|---|---|---|
| | | | | Chances)अन्वेषणं कुर्यात्।<br><br>२. शिक्षकः अनेकानि क्रियापदानि स्फोरकपत्रेषु लिखित्वा स्थापयति। छात्राः तानि लकारानुसारं विभज्य स्थापयेयुः। |
| १३. त्रयोदशं दिनम् | स्वरसन्धीनां ज्ञानम्। | सवर्णदीर्घसन्धिः। | १. सन्धीनां विभजनम्।<br><br>२.क्रीडा–पेटिकोद्घाटनम्। | –२.छात्राः एकस्यां चीटिकायां स्वेष्टानि सवर्णदीर्घसन्धेः उदाहरणानि, स्वनाम च लिखित्वा तां पिधाय एकस्यां पेटिकायां स्थापयन्ति। ततः शिक्षकः\छात्रः स्वनेत्रे पिधाय तस्याः पेटिकायाः ३, ५, |

| | | | | |
|---|---|---|---|---|
| | | | | अथवा १० चीटिकाः स्वीकृत्य उद्घाट्य उच्चैः पठेत्। येषां छात्राणां चीटिकाः स्वीकृताः ते विजयिनः भवन्ति। एवं द्विवारं, त्रिवारं , पञ्चवारं वा कर्तुं शक्यम्। |
| १४. चतुर्दशं दिनम्। | स्वरसन्धीनां ज्ञानम्। | गुणसन्धिः। | १.समूहेतरपदचयनम्।<br>२. क्रीडा– उदाहरणानाम् ऊहा। | १.उदा– विद्यालयः, सुरेशः, सूर्योदयः, देवर्षिः<br>२. छात्राः चीटिकायां गुणसन्धेः एकैकम् उदाहरणं स्वनाम च लिखित्वा शिक्षकाय ददति। ततः शिक्षकः एकां चीटिकां स्वीकृत्य तत्केन लिखितमिति |

| | | | | |
|---|---|---|---|---|
| | | | | उक्त्वा तत्र किमुदाहरणं लिखितमिति अन्यं छात्रं पृच्छति , यदि सः छात्रः सूक्तमुत्तरम् उक्तवान् तर्हि तम् अभिनन्द्य अन्यां चीटिकां स्वीकृत्य एवमेव अनुसरेत्।<br>यदि सः छात्रः सूक्तमुत्तरं न उक्तवान् तर्हि अन्यं छात्रं पृच्छेत्। |
| १५. पञ्चदशं दिनम् | स्वरसन्धीनां ज्ञानम्। | वृद्धिसन्धिः। | १. रसप्रश्नः ।<br>२. पूर्वोत्तरस्वराणाम् अभिज्ञानम् । | १.पि.पि.टि द्वारा रसप्रश्नस्पर्धां कर्तुं शक्यते।<br>२.उदाहरणेषु पूर्वोत्तरस्वराणाम् अभिज्ञानम्। |

| | | | | |
|---|---|---|---|---|
| | | | | (स्फोरकपत्रसाहाय्येन कर्तुं शक्यते।) |
| १५. षोडशं दिनम् | | पूर्वरूपसन्धिः। | १. सन्धिं विभज्य लेखनम्।<br>२. क्रीडा–उदाहरणान्वेषणम्। | १. प्रश्नपत्रसाहाय्येन एनं क्रियाकलापं कर्तुं शक्यते।<br>२.विविधेषु पाठेषु उदाहरणानाम् अन्वेषणं कृत्वा लेखनम्। |
| १७. सप्तदशं दिनम्। | | यण् सन्धिः। | १.क्रीडा–सूक्तचीटिकाचयनम्।<br>२. कोष्टकनिर्माणम्। | १.छात्राः सर्वेषां स्वरसन्धीनाम् उदाहरणानि चीटिकायां विलिख्य एकत्र स्थापयन्ति। ततः शिक्षकः यं सन्धिं वदति तत्सम्बद्धानि उदाहरनानि निर्दिष्टः छात्रः चिनोति। |

| | | | | |
|---|---|---|---|---|
| | | | | २. छात्राः लक्षणानुसारं कोष्टक निर्माणं कुर्वन्ति। |
| १८. अष्टादशं दिनम्। | द्वन्द्वसमासज्ञानम्। | समासः विग्रहवाक्यं च। | १. चतुर्विधसमासानां नामकथनम्।<br>२.समासविग्रहवाक्ययोः विभागकरणम्। | १. छात्राः चतुर्विधसमासानां नामानि कथयेयुः।<br>२. शिक्षकः कानिचन समस्तपदानि,विग्रहवाक्यानि च लिखति। छात्राः तेषां विभागं कुर्वन्ति। |
| १९. एकोनविंशतितमं दिनम्। | | इतरेतरद्वन्द्वसमासः। | १. पदबन्धः।<br>२. चित्रं दृष्ट्वा विग्रहवाक्यलेखनम्। | १. शिक्षकः पदबन्धयुक्तपत्रं छात्रेभ्यः ददाति। छात्राः पदानि पूरयन्ति। |

| | | | | |
|---|---|---|---|---|
| | | | | २.उदाहरणम्–    फलपत्रपुष्पाणि। |
| २०.विंशतितमं दिनम्। | | समाहारद्वन्द्वसमासः। | १. अक्षराणां सम्यक् संयोजनम्। (Unscramble The words)<br>२. विग्रहवाक्यलेखनम्। | १.शिक्षकः समस्तपदे विद्यमानानि अक्षराणि व्यत्यस्तरूपेण लिखति। छात्राः तानि सम्यक् संयोजनं कुर्वन्ति। उदा– का थि र हम् श्वा रो=?<br>२. प्रश्नपत्रसाहाय्येन एनं क्रियाकलापं कर्तुं शक्यते। |
| २१. एकविंशतितमं दिनम्। | वाक्यरचनज्ञानम्। | चित्रं/चलच्चित्रं दृष्ट्वा वाक्यरचनम्। | १. चित्रं दृष्ट्वा वाक्यरचनम्।<br>२. चलच्चित्रं दृष्ट्वा | १.शिक्षकः पि.पि.टि द्वारा चित्राणि दर्शयति। छात्राः तत् दृष्ट्वा वाक्यरचनं कुर्वन्ति। |

| | | | | |
|---|---|---|---|---|
| | | | वाक्यरचनम्। | २. शिक्षकः दशनिमेषात्मकं चलच्चित्रं दर्शयति। छात्राः तत् दृष्ट्वा वाक्यरचनं कुर्वन्ति। |
| २२. द्वाविंशतितमं दिनम्। | वाक्यरचनज्ञानम्। | स्ववाक्यरचनम् | १. प्रदत्तपदानि उपयुज्य स्ववाक्यरचनम्।<br>२. सारांशलेखनम्। | १.उदा– अहम्, तत्र, अस्माकम्<br>२. कथां श्रुत्वा सारांशं लिखेत्। |
| २३. त्रयोविंशतितमं दिनम्। | अनुवादज्ञानम् | संस्कृतेन कन्नडभाषया आङ्ग्लभाषया वा अनुवादः। (सरलवाक्यानुवादः) | १.पदद्वययुक्तवाक्यानामनुवादः।<br>२.पदत्रययुक्तवाक्यानामनुवादः। | १. स्फोरकपत्राणां साहाय्येन अनुवादः।<br>२. पि.पि.टि द्वारा एतत्क्रियाकलापं कर्तुं शक्यते। |

| | | | | |
|---|---|---|---|---|
| २४.चतुर्विंशतितमं दिनम्। | | संस्कृतेन कन्नडभाषया आङ्ग्लभाषया वा अनुवादः। (नातिसरलवाक्यानामनुवादः) | १. मुद्रितगद्यभागस्य अनुवादः। २. व्याकरणांशयुक्तवाक्यानामनुवादः। | १.शिक्षकः मुद्रितगद्यभागयुक्तं पत्रं ददाति। छात्राः तस्य अनुवादं कुर्वन्ति। २. शिक्षकः पि.पि.टि साहय्येन प्रश्नपत्रसाहाय्येन वा एतत्क्रियाकलापं निर्वहेत्। |
| २५. पञ्चविंशतितमं दिनम्। | | कन्नडभाषया आङ्ग्लभाषया वा संस्कृतेन अनुवादः (सरलवाक्यानुवादः) | १. मुद्रितसरलवाक्यानाम् अनुवादः। २. सरलकथायाः अनुवादः। | १.मुद्रितप्रश्नपत्रिकादिसाहाय्येन शिक्षकः एतौ क्रियाकलापौ निर्वहेत्। |
| २६. षड्विंशतितमं दिनम्। | | कन्नडभाषया आङ्ग्लभाषया वा संस्कृतेन अनुवादः। (नातिसरलवाक्यानामनुवादः) | १.तपोवनाभिगमनम् इत्यादिपाठानां संक्षेपेण अनुवादः। | १.मुद्रितप्रश्नपत्रिकादिसाहाय्येन शिक्षकः एतौ क्रियाकलापौ निर्वहेत्। |

| | | | | |
|---|---|---|---|---|
| | | | २ नीतिकथायाः अनुवादः। | |
| २७. सप्तविंशतितमं दिनम्। | पत्रलेखनज्ञानम्। | विरामपत्रम्। | १. पत्रलेखनाभ्यासः। २. प्रश्ननिर्माणम्। | १.छात्राः पत्रलेखनस्य अभ्यासं कुर्वन्ति। २. छात्राः स्वयं प्रश्ननिर्माणं कुर्वन्ति। |
| २८. अष्टाविंशतितमं दिनम्। | | पुस्तकप्रेषणाय पत्रम्। | १. मञ्जूषातः उचितपदं चित्वा रिक्तस्थानपूरणम्। २. प्रश्नानुसारम् उत्तरलेखनम्। | १.मुद्रितप्रश्नपत्रिकादिसाहाय्येन एतौ क्रियाकलापौ सुकरौ। |
| २९. एकोनत्रिंशत्तमं दिनम्। | प्रबन्धलेखनज्ञानम्। | १. देशभक्तिविषयक प्रबन्धलेखनम्। २. ग्रन्थालयविषयक | १. मञ्जूषातः उचितपदं चित्वा प्रबन्धरचनम्। २. प्रदत्तपदानि उपयुज्य | शिक्षकः रिक्तस्थानयुक्तं, मञ्जूषायाम् उचितपदैर्युक्तं प्रबन्धं विलिख्य छात्रेभ्यः ददाति। छात्राः तत् पूरयेयुः। |

| | | | | |
|---|---|---|---|---|
| | | प्रबन्धलेखनम्। | प्रबन्धरचनम्। | २. छात्राः प्रदत्तपदानि उपयुज्य प्रबन्धरचनं कुर्वन्ति। |
| ३०. त्रिंशत्तमं दिनम्। | | १.प्रदत्तविषये प्रबन्धरचनम्।<br>२. स्वेष्टविषये प्रबन्धरचनम्। | १. रामायणम्, विद्यालयप्रवासः, मम शाला, परिसरः, इत्यादिविषयेषु प्रबन्धरचनम ्।<br>२. छात्राः स्वेष्टविषयेषु प्रबन्धरचनं कुर्वन्ति । | १. छात्राः रामायणम्, विद्यालयप्रवासः, मम शाला, परिसरः, इत्यादिविषयेषु प्रबन्धरचनं कुर्युः।<br>२.छात्राः स्वेष्टविषयेषु प्रबन्धं लिखेयुः। |

*** इति शम् ***